# 9. मेलापकः



अहमदः - मोहन ! अद्य तु तव वेशः अतीव सुन्दरः अस्ति । कथय, कथं नवीनानि वस्त्राणि धारयसि ?

मोहनः - अहमद ! किं त्वं न जानासि, यद् अद्य अस्माकं ग्रामे विजयदशम्याः मेलापकः अस्ति । अद्य अहं तत्र गच्छामि । ग्रामस्य अन्ये बालकः बालिकाः अपि तत्र गमिष्यन्ति । किं त्वं मया सह न चलिष्यसि ?

अहमदः - मोहन ! अयं तु महान् सुअवसरः अस्ति । वद तत्र किं भविष्यति ?

मोहनः - भ्रातः ! तत्र महान् जनसम्मर्दः भविष्यति । तत्र आवां विविधानि दृश्यानि द्रक्ष्यावः । रामरावणयोः युद्धस्य अभिनयः अपि तत्र भविष्यति ।

अहमदः - कीदृशं युद्धं सुस्पष्टं कथय ? किं तत्र रामलीला भविष्यति?

मोहनः - आम् तावत् त्वं तु जानासि एव । पुनः किं पृच्छसि ? अतः त्वम् अपि सज्जितः भव ।

अहमदः - क्षणं विरम, अहम् अपि सज्जितः भवामि । स्मरामि गत वर्षे अपि अहं मातुलग्रामे रामलीलाम् अपश्यम्। तत्र ऋक्षराजजाम्बवतः अभिनयः अति मनोहरः आसीत् । अन्यानि अपि बहूनि दृश्यानि मनोहराणि आसन् । तत्र अहम् अवश्यमेव गमिष्यामि ।

मोहनः - आगच्छ, आवां चलावः ।

## अभ्यासः

### निम्नांकित प्रश्नों के उत्तर संस्कृत भाषा में लिखिए ।

1. मेलापकः कुत्र अभवत् ?
2. ऋक्षराजजाम्बवतः अभिनयः कीदृशः आसीत् ?
3. तत्र के गमिष्यन्ति ?
4. तत्र कः अवश्यमेव गमिष्यति ?

### संस्कृत में अनुवाद कीजिए -

1. हमारे देश में बहुत से मेले होते हैं ।
2. उनमें विजयदशमी का मुख्य स्थान है ।
3. हम दोनों मेला देखने जायेंगे ।
4. गतवर्ष भी हमारे गांव में मेला हुआ था ।
5. मेले में राम-रावण के युद्ध का दृश्य होगा ।

### रिक्त स्थानों की पूर्ति कीजिए -

1. तत्र आवां .............. द्रक्ष्यावः ।
2. गतवर्षे अपि ................ मातुल ग्रामे .............. अपश्यम् ।
3. तत्र .................... अवश्यमेव गमिष्यामि ।
4. क्षणं विरम्, अहम् अपि .............. भवामि ।
5. राम-रावणयोः युद्धस्य ................. अपि तत्र भविष्यति ।

## शब्दार्थाः

| | | |
|---|---|---|
| मेलापकः | - | मेला |
| विविधानि | - | अनेक प्रकार के |
| जनसम्मर्दः | - | भीड़ |
| सज्जितः | - | तैयार |

PG7PAZ

'अवसर' में 'सु' उपसर्ग जोड़कर 'सुअवसर' शब्द बनता है, जिसका अर्थ है अच्छा मौका, इसी प्रकार 'स्पष्ट' में सु जोड़कर 'सुस्पष्ट' शब्द बना, इसका भी अर्थ हुआ अच्छी प्रकार से स्पष्ट (व्यक्त) ।